# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्रीप्रथम, सेमेस्टर-१** | **प्रश्नपत्रम् - ७** | **गुणा: - ७०** |
| **विषय: - पुराणेतिहास:** | **कोड - CE-1.1.1** | **समय: - ०३-०६** |
| **दिनाङ्क: - १२.१२.२०१६** | **ग्रन्थ: -** *पद्मपुराणान्तर्गतं माहात्म्यम् श्रीमद् भागवते प्रथमस्कन्ध:* | |

---

**प्रथमान्विति: ( युनिट - १ )**

**प्रश्न: १ कयोश्चिद् त्वयो: ससन्दर्भं व्याख्या कार्या । ०८**

(१) *सत्यं नास्ति तप: शौचं दया दानं च विद्यते ।*
*उदरम्भरिणो जीवा वराका कूटभाषिण: ॥*

(२) *यद्दर्शनं च विनिहन्त्यशुभानि सद्य: श्रेयस्तनोति भवदु:खदवार्दितानाम् ।*
*नि:शेषशेषमुखगीतकथैकपाना: प्रेमप्रकाशकृतये शरणं गतोऽस्मि ॥*

(३) *धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना ।*
*धिग्धनं चानपत्यस्य धिक्कुलं सन्ततिं विना ॥*

**प्रश्न: २ कस्याप्येकस्य सविस्तरं उत्तरं लिखत । ०८**

(१) *नारदभक्त्यो: संवादं विलिख्य भक्ते: क्लेशनिवारणं नारदकृत उद्योगं वर्णयत ।*
(२) *नारदकृतं कलिदोषदर्शनं वर्णयत ।*
(३) *गोकर्णोपाख्यानं चर्चयत ।*

**प्रश्न: ३ द्वयो: टिप्पणी कार्या । ०६**

*(१) सनकादिकृत भागवतमहात्म्यम् ।*
*(२) धुन्धुकारिण: प्रेतत्वप्राप्ति: ।*
*(३) सप्ताहश्रवणविधि: ।*

**प्रश्न: ४ त्रयाणां लघूत्तराणि यच्छत । ०३**

(१) *नारदसनकादीनां कुत्र मेलनम् अभवत् ?*
(२) *किं नाम भक्त्या: पुत्रयो: ?*
(३) *गोकर्ण इत्यस्य कोऽर्थ: ?*
(४) *व्योमवाण्या किम् उक्तम् ?*

**द्वितीयान्विति: ( युनिट - २ )**

**प्रश्न: ५ अधोलिखितयो: एकस्य सप्रसङ्गं व्याख्यां लिखतु । ०४**

(१) *अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ।*
*तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽत्मभवात्मभूतम् ॥*

(२) *वपनं द्रविणादानं स्थानान्निर्यापणं तथा ।*
*एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिक: ॥*

**प्रश्न: ६ कस्याप्येकस्य सविस्तरं उत्तरं ददत । ०७**

(१) *श्रीकृष्णस्य स्तवनपूर्वकं भीष्मस्य महाप्रस्थानं लिखत ।*
(२) *पूर्वजन्मवृत्तान्तपूर्वकं नारदस्य व्यासोपदेशं वर्णयत ।*

**प्रश्नः ७** **द्वयोः टिप्पणी कार्या ।** **०६**

*(१) कुन्तीस्तुतिः ।*

*(२) उत्तरास्तुतिः ।*

*(३) अर्जुनस्तुतिः ।*

**प्रश्नः ८** **त्रयाणां लघूत्तराणि देयानि ।** **०३**

*(१) कति अवताराः ?*

*(२) व्यासस्य मातुः नाम किम् ?*

*(३) परीक्षित् शब्दस्य कोऽर्थः ?*

*(४) प्रथमस्कन्धे कति अध्यायाः का च लीला ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९** **अधोलिखितेषु द्वयोः सप्रसङ्गं व्याख्यां यच्छत ।** **०८**

*(१)* *आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् ।*
*उवास कतिचिन्मासान् सुहृदां प्रियकाम्यया ॥*

*(२)* *मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ।*
*निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥*

*(३)* *अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीला ।*
*राज्ञां कुले ब्राह्मणपादशौचात् दूराद्विसृष्टं बत गर्ह्यकर्म ॥*

**प्रश्नः १०** **कस्याप्येकस्य उत्तरं सविस्तरं लिखत ।** **०८**

*(१)* *ब्राह्मणद्वारा पूर्वनिर्दिष्टं परीक्षितः जन्मोत्सवलक्षणानि लिखत ।*

*(२)* *अर्जुनात् यदुकुलसंहारं श्रुत्वा पाण्डवानां हिमालयमहाप्रयाणं लिखत ।*

**प्रश्नः ११** **द्वयोः टिप्पणी कार्या ।** **०६**

*(१)* *धर्मस्य चत्वारः पादाः ।*

*(२)* *परीक्षित्–धर्म संवादः ।*

*(३)* *परीक्षिता दत्तानि कलिस्थानि ।*

**प्रश्नः १२** **त्रयाणां लघूत्तराणि यच्छत ।** **०३**

*(१) उत्तरायाः पत्युः नाम किम् ?*

*(२) द्वारिका शब्दस्य कोऽर्थः ?*

*(३) प्रायोपवेषणं केन कृतम् ?*

*(४) मंगलाचरणं कतिविधं ? प्रथमस्कन्धे कीदृशं ? लिखत ।*

=०=